| | | |
|---|---|---|
| Brown tawny 5. | पिङ्गः पिशङ्ग इत्युक्तो बभ्रुः कपिलः पिङ्गलः । | |
| Variegated, speckled 2. | सारङ्गः शबलो वर्णः कल्माषः कृष्णपाण्डुरः ॥७३६॥ | Greyish white 2. |
| Reddish yellow 2. | [a] पिञ्जरः पीतरक्तः स्याद्धूसरः स्तोकपाण्डुरः । | Greyish white 2. |
| Dark red 2. | [b] रक्तश्यामो भवेद्धूम्रो धूमलः स च कथ्यते ॥७३७॥ | |
| Lilyleaf like lady 2. | श्येनी कुमुदपत्राभा शुकाभा हरिणी स्मृता । | Parrot like lady 2. |
| The lotus leaf like. lady; rose red lady 2. | जपाकुसुमसंकाशा लोहिनी परिकीर्तिता ॥७३८॥ | |
| Regular course 2. | परिपाट्यानुपूर्वी स्यादुपशायो[c]ऽनुपात्ययः । | 1. Sleeping in turn, rotation for sleeping with other. |
| Progression, succession 2. | अनुक्रमश्च पर्यायो विशायः परिकीर्तितः ॥७३९॥ | 2. Absence of neglect following the appointed order. |
| Envy, hypocrisy 5. | ईर्ष्या स्यात्कुहना दम्भो मिथ्याचर्या च [d] कुक्कुटिः । | |
| Jugglery, delusion 5. | कुसृतिर्[e]निकृतिर्माया शाम्बरी [f] पथकल्पना ॥७४०॥ | |
| Variegated, mixed 6. | [g] चित्रकिर्मीरकल्माषशबलोन्मिश्रकर्बुराः । | |
| Combined, mixed 5. | करम्बः कवरः शारः सम्पृक्तः खचितः समाः ॥७४१॥ | |
| Longing, strong desire 7. | आयल्लकमुत्कण्ठा स्यादुत्कलिका रतिश्च रणरणकम् । | |
| | औत्सुक्यं हृल्लेखो विरहवियोगौ च तुल्यार्थौ ॥७४२॥ | Separation 2. |
| Contrary, opposed 4. | प्रतिकूलं प्रतिलोमं प्रतीपमुक्तं प्रसव्यमेकार्थम् । | |
| Covered, concealed 5. | अपवारितं च पिहितं संवीतं संवृतं स्थगितम् ॥७४३॥ | |
| A part, a limb, a portion 5. | आहुः प्रतीकमवयवमपघनमङ्गं तथैकदेशं च । | |
| Exceeding much 4. | उल्वणमुद्धतमुद्भटमुत्कटमिति नातिनानार्थाः ॥७४४॥ | |
| Assembly 6. | समाजः संसदास्थानी सभा स्यात्परिषत्सदः । | |
| Wonder, surprise 5. | चित्रमद्भुतमाश्चर्यं विस्मयश्चोद्यमुच्यते ॥७४५॥ | |

a पिञ्जिरः, पिंजिरः परिरक्तः b रक्तश्याम c स्यादुदाशयो, स्यादुप्तशयो d कुर्कुटिः, कुकुटिः e निष्कृतिं, निःकृति f पृथुकल्पिनी g चित्रकर्मीर ।